International Journal of Sanskrit Research 2020; 6(6): 07-11

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(6): 07-11
© 2020 IJSR
www.anantaajournal.com
Received: 26-08-2020
Accepted: 09-10-2020

**डा. रा. सुब्रह्मण्य भिडे**
सहायाचार्यः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**डा. रा. सुब्रह्मण्य भिडे**
सहायाचार्यः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः, आंध्र प्रदेश, भारत

# मानवीयमौल्यानां परिशीलनम्

**डा. रा. सुब्रह्मण्य भिडे**

## प्रस्तावना

विदितमेवेदं भवतां समेषां यत् समस्तस्य संस्कृतवाङ्मयस्य मूलाधारभूतेषु वेदेषु, तथा आदिकाव्ये रामायणे, इतिहासे महाभारते, पुराणेषु, भगवद्गीतासु, नैकेषु काव्येषु मानवीयमौल्यानि बहुत्र विराजन्त इति।

तथापि विषयस्यास्योपक्रमः केनचिद्दीपेन सूर्यं दर्शयितुम् उद्युक्तस्य पुरुषस्य प्रयत्न इव मे भाति। यतः मानवीयमौल्यानि विना संस्कृवाङ्मयं भारतीया संस्कृतिर्वा नास्ति। अथापि अज्ञानिनः लोकस्य अयं विषय: अस्पष्ट एव भवति। तत् अस्पष्टज्ञानम्, मिथ्याज्ञानम्, अन्यथाज्ञानम्, अर्धज्ञानं वा अपसारयितुम् अस्मिन् विषये चर्चा सामयिकी भवत्येव।

'मानवीयमौल्यानि कानी'त्यत्र इत्थमालोचयितुम् शक्यते यत् यम-नियमादिषु उक्ताः सर्वजनसम्बद्धाः केचन गुणाः।

अत्र याज्ञवल्क्यः यम-नियमान् एवं निर्दिशति-

ब्रह्मचर्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता।
अहिंसाऽस्तेयमाधुर्ये दमश्चेति यमाः स्मृताः॥
स्नानं मौनोपवासेज्या-स्वाध्यायोपस्थनिग्रहाः।
नियमो गुरुशुश्रूषा शौचाऽक्रोधाऽप्रमदता॥ (या.स्मृ.३.३१२-३१३) इति।

अत्रोक्तेषु बहुषु मौल्येषु परम्पराहेतुना मानवीयमौल्येषु सत्स्वपि, तेषु मुख्यतया इमानि निर्देष्टुं प्रायः विमतिर्न भवति। तान्येतानि भवन्ति, यानि दया, क्षान्तिः, सत्यम्, अकल्कता, अहिंसा, माधुर्यं, दमः, अक्रोधः इत्यादीनि तत्वानि। अपराणि च तत्वानि, परोपकारः, दानम्, पूर्तकर्माणि इत्येवंरूपाणि।

अत्र विशिष्य मानवीयमौल्यानि धर्मलक्षणात् बहिर्न भवन्तीत्यमंश: मनुवचनेष्वेवं दृश्यते-

> धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
> धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥
> (म.स्मृ.६.९२) इति।

धृत्यादिष्वेषु गुणेषु एकैकेनापि आत्मसात्कृतेन गुणेन मानवीयमौल्यानि संवर्धितानि भवन्ति। उदाहरणार्थं क्षमा। परेण अपकारे कृतेऽपि तस्य प्रत्यपकारस्य अनाचरणं 'क्षमा' इत्युच्यते।

अपकारं मनसि निधाय प्रत्यपकारः क्रियते चेदेव भूयो भूयो दोषः अभिवर्धते। प्रत्यपकारस्य अनाचरणेन दोषः प्रशमतामेत्य, समाजे सहजतया शान्तिः स्थिरा भवति। किन्तु समूहतायाः सम्बद्धे विषये राष्ट्रे देशे वा अन्याक्रान्ते, आततायादिविचारेषु वा क्षमा न करणीया। यतः शास्त्रेणैव क्षमा उपदिश्यते। शास्त्रेणैव क्षमा कुत्र आचरणीया ? कुत्र नाऽचरणीया ? इति च शास्त्रेणैव क्षमा उपदिश्यते। सर्वत्र शास्त्रीये विषये शास्त्रमेव प्रमाणं भवति। विचारोऽयं भवतु।

एवं दमः। दमो नाम विकारहेतुविषयसंनिधानेऽपि मनसः अविक्रियत्वं दमः, इन्द्रियनिग्रह इति यावत्। तत्तदिन्द्रियविषयेषु स्पर्शादिषु, इन्द्रियाणां निग्रहणेन बहवोऽनर्था दूरीभवन्ति। यथा

लोके बहुधा दृश्यन्ते श्रूयन्ते च स्त्र्यादिषु अत्याचारदिवृत्तान्ताः। एवं मादकद्रव्यपानेन दाम्पत्ये, समाजे, मार्गे, प्रयाणे, स्वस्य परेषां च महती हानिः। केवलं मानवीयमौल्येषु एकतमेन दमेनैव

लोके महतीम् अनर्थपरम्पराम् अवरोद्धुं शक्नुमः।

एवम् अस्तेयम्। अस्तेयं नाम अन्यायेन परधनादीनाम् अग्रहणम्। स्तेयेन नाम 'अन्यायेन

परधनादीनां ग्रहणेन' मानवीयमौल्यानि अधमतां यान्ति। यत एवम् अस्तेयमपि मानवीयमौल्येष्ववन्य-तमम्।

मानवीयमौल्येषु प्रथमम् असाधारणं सर्वजनसाध्यं किञ्चित् तत्वं वर्तते यत्तत् सत्यम्।

'सत्यं' प्रथमम् अतिमुख्यम् च साधनतत्वमिति वक्तुं शक्यते। श्रुतिरपि सत्यत्वमेवं प्रशंसति-

'सत्येनोत्तभिता भूमिः' (ए.कां.१.६) 'सत्येन वायुरावाति। सत्येनादित्यो रोचते। दिवि सत्यं वाचः प्रतिष्ठा। सत्ये सर्वं प्रतिष्ठितम्। (तै.आ. १०.७८) इत्यादिरूपेण।

वेदः उद्घोषयति - वायुः सत्येन वाति। सत्येनैव आदित्यः लोकं प्रकाशयति। देवलोकेऽपि

वाचः प्रतिष्ठा सत्यमेव। किमधिकेन वचसा। सत्ये एव सर्वं प्रतिष्ठितम् इति।

असत्यभूतेन मनसा वचसा कर्मणा च लोके बहवो भेदा उत्पद्यन्ते। एकान् प्रति

योद्धुं, विवदितुं, प्रहर्तुं, संहर्तुं प्रोत्साहः, अशान्त्युत्पादनम् इत्येवमादयो बहवोऽनर्था जायन्ते, नैके

लोकनाशकहेतव उत्पत्स्यन्ते च।

एवं सर्वाम् अनर्थपरम्पराम् अवरोद्धुं, प्रतिरोद्धुं च अमानवीयतां, संवर्धयितुं च मानवीयतां,

एकं प्रबलं शस्त्रं सर्वेषां वर्तते यत्तत् सत्यम्।

ईदृशस्य सत्यवचसः भाषणे पथं प्रदर्शयति इदं प्रसिद्धं वाक्यम् -

> सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्।
> प्रियं च नाऽनृतं ब्रूयादेष धर्मः सनातनः॥ (म.स्मृ. ४.१३८) इति।

अस्मिन्नपि सत्यभाषणस्य पथप्रदर्शकवाक्ये मानवीयमौल्यमेव गोचरो भवति।

यत एवम् (अतः) सकलस्य लौकिक-वैदिकव्यवहारस्य आधारभूतं, सर्वप्रतिष्ठाभूतं सत्यं त्यजामः, तर्हि अवश्यं मानवीयता अधः पतत्येव।

मानवीयमौल्येषु अन्यतमं वर्तते स्त्रीणां विषये व्यवहारः। अस्मिन् विषये शास्त्रेषु

किमुच्यत इति किञ्चिद्विमृश्यते। तत्रेदं मतुवाक्यमित्थं भवति -

> पितृभिर्भ्रातृभिश्चैता पतिभिर्देवरैस्तथा।
> पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥
> (म.स्मृ.३.५५) इति।

केवलं विवाहकाले स्त्रियः पूज्या भूषयितव्या इति न। सर्वदापि पित्रा भ्रात्रा पत्या देवरेण, एव सर्वैरपि सर्वदा ताः पूज्या भूषयितव्या इति उच्यते। स्त्रीणां विषये अस्मिन्

प्रपञ्चे सनातनवैदिकेतर-धर्मानुयायिभिः कथं व्यवह्रियत इति सर्वे जानन्त्येव। स्त्रियः भोग्याः पदार्थाः, आक्रम्याः, इत्येवंरूपेण तासु दौर्जन्यं दृश्यते लोके। एवं सति अस्माकं संस्कृतेः आधारभूतेषु शास्त्रेषु, मानवीयमौल्येष्वन्यतमे स्त्रीणां प्रति व्यवहारे कथं प्राशस्त्यं दत्तमिति इतः पूर्वम् एकेन वचसा प्रदर्शितम्। न केवलमिदमेकं वचः। बहूनि वचनानि सन्ति। तत्रेदं प्रथमं प्रसिद्धं वचः-

यत्र नार्यस्तु पूज्यन्ते रमन्तेतत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥
(म.स्मृ.३.५६) इति।

यत्र नार्यः पूज्यन्ते तत्र देवताः प्रसीदन्ति। यत्र नार्यः न पूज्यन्ते तत्र
सर्वाः यागादिक्रियाः अफला भवन्तीति भावः।
स्त्रीणां पूजनेन देवतातुष्टिर्भवति। किं तया देवतातुष्ट्या ? देवतातुष्ट्या सर्वकामावाप्तिः।
मनोऽभीष्टसिद्धिः, इत्यादीनि प्रयोजनानि सम्भवन्ति। अतः स्त्रीणां विषये पूज्यता सर्वत्र आवश्यकी एव।

अधुना द्वितीय-तृतीयवाक्यमधुना पश्यामः-

शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः॥
(म.स्मृ.३.५७-५८) इति।

जामयो नाम पत्नी-दुहितृ-स्नुषाद्याः गृहे भवाः सन्निहिता असन्निहिताश्च सम्बन्धिन्यः
स्त्रियः। एताः परितापादिना दुःखिन्यः यदि भवन्ति तर्हि तत्कुलं विनश्यति इति। पश्यन्तु, स्त्रीविषये
कथमौन्नत्यं प्रकटितम् इति, कथं च शास्त्रेषु देवत्वं तासु स्थापितम् इति।
एवं ताः सर्वदा भूषण-आच्छादन-अशनादिना सत्कारेषु, उपनयन-विवाहाद्युत्सवेषु च पूज्याः। पत्न्या सह पतिः, पत्या सह पत्नी च मिथः सन्तुष्ट्या यदि भवन्ति तर्हि पुत्र-पौत्रादिसहितं तत्कुलं चिरं श्रेयः प्राप्नोति। यदि स्त्री अतुष्ट्यादिना न दीप्तिमती भवति तदा स्वामिनं न हर्षयेत्।
अप्रहर्षात् प्रजननादिकं न सम्भवति। स्त्रियां दीप्तिमत्यां सर्वं तत्कुलं दीप्यते।
तस्याम् अरोचमानायां सर्वं न रोचत इत्यत्र इमानि वचनाति भवन्ति-

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैनरैर्नित्यं सत्कारेषूत्सवेषु च॥
सन्तुष्टो भार्यया भर्त्रा भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥
यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत्।
अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्तते॥
स्त्रियां तु रोचमानायां सर्वं तदोचते कुलम्।
तस्यां त्वरोचमानायां सर्वमेव न रोचते॥
(म.स्मृ.३.५९-६२) इति।

विदाङ्कुर्वन्तु भवन्तः, यत् मान्वीयमौल्येष्वन्यतमे स्त्रियः प्रति व्यवहारविषये कथमुन्नतोन्नतभावः प्रकटीकृतः शास्त्रे। स्त्रीविषये एतादृशः औन्नत्यभावः प्रपञ्चे कुत्रचिदपि देशे धर्मे समाजे वा न दृश्यत इति मे दृडा मतिः।
मानवीयमौल्येषु इदमेकमन्यतमं यत् - हीनाङ्गान् अतिरिक्ताङ्गान् विद्याहीनान् बुद्धिहीनान् रूपहीनान् द्रव्यहीनान् तैस्तैः शब्दैः अपहास्येन अपमानेन वा आह्वानं, निन्दा, भर्त्सनम्, आक्षेपः, इत्येवंरूपेण अकरणम्। अस्मिन् विषये अस्माकं संस्कृतेः शास्त्रवाक्यं एवं शास्ति–

हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान्वयोऽधिकान्।
रूपद्रव्यविहीनांश्च जातिहीनांश्च नाक्षिपेत् ॥ (म.स्मृ. ४.१४१) इति।

एवञ्च सर्वं व्यवहारं मङ्गलमयरीत्या एव आचरेत्। अमङ्गलमपि मङ्गलमित्येव वदेत्। पुनः मङ्गलं ततोऽप्यधिकेन वचसा 'पुण्यं' 'प्रशस्तम्' इत्यादिना व्यवहरेत्। निष्प्रयोजनं वैरं विवादं च न केनचिदपि

कुर्यादिति अस्मिन् वाक्ये मानवीयमौल्यानि गोचराणि भवन्ति। यथा-

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत्।
शुष्कवैरं विवादं च न कुर्यात्केनचित्सह॥ (म.स्मृ. ४.१३९) इति।

एवञ्च प्रयाणकाले, गृहे स्थितिसमये, इत्येवं बहुषु स्थलेषु वृद्धैः सह व्यवहारसमये
तेषाम् अनादरणं लोके बहुधा दृश्यते। इदमपि मानवीयमौल्येष्वन्यतमम्। अतः 'वृद्धैः सह व्यवहारः कथं भवेदि'ति मनुरित्थं निर्दिशति-

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकम्।
कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्॥ (म.स्मृ.४.१५४) इति।

वृद्धान् अभिवादयेत्, आगतेषु तेषु स्वस्य आसनं दद्यात्। तान् उपासीत। गच्छतां तेषां पृष्ठतः अनुगच्छेत् इति।
अत्र वृद्धानां नाम, गुरु-पितृ-मातृ-विदुषाम् अभिवादनम्, उपासनम्, अनुगमनम्, इत्यादिकं कर्तुं शक्यम्। किन्तु अपरिचितानाम् अविदुषां विद्याबुद्धिकुलहीनानां विषये एवं कर्तुं शक्यं वा ? इत्यत्र पथप्रदर्शकानि वचनान्तराणि भवेयुः। परन्तु अवरावरं वृद्धानां विषये धार्मिकेतरेषु लौकिकव्यवहारेषु आसनदानविषयः न परास्तो भवति, अपि तु विधानं सन्दृश्यत एव।
मानवीयमौल्येषु इदमेकमन्यतमं वर्तते यत् परस्त्रीणाम् अनुपसेवनम्। उपसेवनेन किं भवतीत्यत्र बहून्युदाहरणानि प्रत्यहं पश्यन्त एव स्मः। परदारोपसेवनेन समाजे अशान्तिः, कलहः, व्यवस्थाभङ्गः, पति-पत्न्योः अन्यतरस्य वियोगः, पुत्रादीनाम् अनाथत्वम्, समाजस्य अव्यवस्थापत्तिः, इत्यादीनि अनर्थपरम्परायां कानिचन उदाहरणानि। अस्मिन् विषये इदं वाक्यम् एतादृशम् असह्यं प्रदर्शयति। यथा -

न हीदृशमनायुष्यं लोके किञ्चन विद्यते।
यादृशं पुरुषस्येह परदारोपसेवनम्॥ (म.स्मृ. ४.१३४) इति।

एवञ्च आपस्तम्बधर्मसूत्रेषु - अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति (आ.ध.२.४.१४) इत्यनेन सूत्रेण मानवीयमौल्यानि एवं गोचराणि भवन्ति, यत् अतिथिषु गृहमागतेषु, दातुं किमपि नास्ति चेदपि सतां गृहे उपवेष्टुम् उपवेशनयोग्या भूमिः, पानाद्यर्थम् उदकं, शयनासनयोग्यानि तृणानि नाम कटादीनि, कल्याणी वाक्, नाम 'स्वागतम्' 'आस्यताम्' इत्यादीनि वाक्यानि न क्षीयन्ते खलु ? इति प्रसिद्धेन वचसा अवरावरं स्थलं, जलं, आसनं, मङ्गलं वचः, एतानि दद्यादिति विधीयते। इदमेव वचः मनुस्मृतावेवमभिधीयते-

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥ (म.स्मृ. ३. १०१) इति।

तथैव 'गृहमागता अतिथयः पूर्वं भोजयितव्या' इति, 'बालाः वृद्धाः रोगसम्बन्धाः गर्भिणीस्त्रियः स्वस्रादयः, एतेऽपि पूर्वं भोजयितव्या' इति, 'भोजनकाले यः कोऽपि अन्नार्थी आगतश्चेदपि तं न तिरस्कुर्या'दिति च, एषु सूत्रेषु उच्यते - अतिथीनेवाग्रे भोजयेत्। बालान्वृद्धान् रोगसम्बन्धान्स्त्रींश्चान्तर्वत्नीः। काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम्। (आ.ध.२.४.११-१३) इति।
एवं शास्त्रे बहुषु विषयेषु मानवीयमौल्यानि द्रष्टुं दर्शयितुं च शक्नुमः। तथा चाऽस्मिन्
प्रबन्धे मानवीयमौल्येषु केषाञ्चन मौल्यानां क्षमा-दम-अस्तेय-सत्यानां, तथा च स्त्रियः प्रति
व्यवहारविचारः, हीनाङ्गादीन् विद्या-बुद्धि-रूप-द्रव्यहीनांश्च प्रति व्यवहारः, सर्वस्य व्यवहारस्य
मङ्गलत्वं, शुष्कस्य वैरस्य विवादस्य वा अकरणं, वृद्धानाम् आसनदानविचारः, परस्त्रीणाम्
अनुपसेवनविचारः, परेभ्यः अतिथिभ्यो वा भोजनादिदानविचारे गृहे द्रव्याभावेऽपि व्यवहारविचारः, अतिथ्यादीनां पूर्वं भोजयितृत्वविचारः, इत्येवं नैकानि मानवीयमौल्यानि विचारितानि।
एवञ्च मानवीयमौल्यानि विहाय अस्माकं भारतीया संस्कृतिः, तत्कारणीभूत-सनातनधर्मो

वा नास्ति। भारतदेशप्रसूतैः वैदिकधर्मानुयायिभिः मानवीयमौल्यानाम् अनुसरणेनैव इयं भारतभूमिः, मानवीयमौल्यदृष्टिशून्यैः अधर्मं धर्मं मन्यमानैः विदेशस्थैः कपटिभिः क्रूरिभिः राजापसदैः आक्रान्ता। अत्र वक्तव्यो विषयः अयमेव यत् मानवीयमौल्यानि त्यक्त्वा भारतदेशस्य संस्कृतिः सनातनवैदिक-संस्कृतिनिदानभूतं शास्त्रं वा नास्तीत्यलं विस्तरेणेति शम्।